।। দ্ৱিতীয়োঽধ্যায়ঃ ।।

শ্ৰৌতস্মৃতিৱিৰুদ্ধত্ৱাত স্মৃতয়ো ন গুণান হৰেঃ ।
নিষেদ্ধুং শক্নুয়ুৰ্ৱেদা নিত্যত্ৱান্মানমুত্তমম ।। ১ ।।

দেৱতাৱচনাদাপো ৱদংতীত্যাদিকং ৱচঃ ।
নায়ুক্তৱাদ্যসন্নেৱ কাৰণং দৃশ্যতে ক্ৱচিত ।। ২ ।।

অসজ্জীৱপ্ৰধানাদিশব্দা ব্ৰহ্মৈৱ নাপৰম ।
ৱদংতি কাৰণত্ৱেন ক্ৱাপি পূৰ্ণগুণো হৰিঃ ।। ৩ ।।

স্ৱাতংত্ৰ্যাত সৰ্ৱকৰ্তৃত্ৱান্নায়ুক্তং তদ্ৱদেচ্ছ্ৰুতিঃ ।
ভ্ৰাংতিমূলতয়া সৰ্ৱসময়ানাময়ুক্তিতঃ ।। ৪ ।।

ন তদ্ৱিৰোধাদ্ৱচনং ৱৈদিকং শংক্যতাং ৱ্ৰজেত ।
আকাশাদিসমস্তং চ তজ্জং তেনৈৱ লীয়তে ।। ৫ ।।

সোঽনুত্পত্তিলয়ঃ কৰ্তা জীৱস্তদ্ৱশগঃ সদা ।
সদাভাসো হৰিঃ সৰ্ৱৰূপেষ্ৱপি সমঃ সদা ।। ৬ ।।

মুখ্যপ্ৰাণশ্চেংদ্ৰিয়াণি দেহশ্চৈৱ তদুদ্ভৱঃ ।
মুখ্যপ্ৰাণৱশে সৰ্ৱং স ৱিষ্ণোৰ্ৱশগঃ সদা ।। ৭ ।।

সৰ্ৱদোষোজ্ঝিতস্তস্মাদ্ভগৱান পুৰুষোত্তমঃ ।
উক্তা গুণাশ্চাৱিৰুদ্ধাস্তস্য ৱেদেন সৰ্ৱশঃ ।। ৮ ।।

।। ইতি শ্রীমদানংদতীর্থভগৱত্পাদাচার্য়ৱিৰচিত ব্রহ্মসূত্রাণুভাষ্যে দ্ৱিতীয়োঽধ্য়ায়ঃ ।।

www.yousigma.com